# केन्द्रीयसंस्कृतविश्वविद्यालयः

(संसदः अधिनियमेन संस्थापितः भारतसर्वकारस्य शिक्षामन्त्रालयाधीनः)

गुरुवायूर् परिसरः, पुरनाट्टुकरा, तृश्शूर्, केरलम्-680551

शिक्षाशास्त्रविद्याशाखा2024-2025

## राष्ट्रियशिक्षादिवसः – 11-11-2024


**(मौलाना अबुल कलाम आजादमहोदयस्य जन्मदिवसमुपलक्ष्य)**

आचरणम् – 12-11-2024

## कार्यक्रमविवरणं तथा निवेदनञ्च -

प्रतिवर्षमिव अस्मिन् शैक्षिकसत्रे अपि **राष्ट्रियशिक्षादिवसः** 11-11-2024 समाचरणीय इति केन्द्रीयसंस्कृतविश्वविद्यालस्य आदेशानुगुणं गुरुवायूर् परिसरस्य निदेशकवर्यैः आचार्य के.के.षैन् महोदयैः निर्देशः प्रायच्छत् । तत्रामीषां निदेशकवर्याणां विचारस्तावदासीत् यत् – शिक्षाशास्त्रविद्याशाखा कार्यक्रमनिर्वहणे मुख्यभूमिकां स्वीकुर्यादिति। तदनु शिक्षाशास्त्रविद्याशाखा-कार्यालयपक्षतः काचित्कार्यसाधनसमितिश्च घटिता यस्यां शिक्षाशास्त्रविद्याशाखायाः प्राध्यापकः डा. सि. श्यामराज**महोदयः समन्वयकरूपेण,** प्राध्यापिका **डा. के.बि. श्रुतिमहोदया सहसंयोजिकारूपेण तथा अन्ये शिक्षकाः सदस्यरूपेण** संसूचिताः वर्तन्ते । प्रदत्तनिर्देशानुगुणं समित्या कार्यक्रमनिर्वहणविषये चर्चा कृता । छात्राध्यापकाः लाभान्विता तथा सक्रियाश्च भवेयुरिति शिक्षाशास्त्रविद्याशाखाध्यक्षस्य मूल्ययुक्तविचारं स्वीकृत्य विशिष्टव्याख्यानं (Special Lecture) तथा छात्राणां पत्रप्रस्तुतिः इति द्वौ कार्यक्रमौ सुनिश्चितौ। सन्दर्भेऽस्मिन् साहित्यशास्त्रविद्याशाखायाः **प्रो.ई.आर् नारायणमहोदयाः** शिक्षादिवसमुपलक्ष्य **विद्यामूल्यानि - धर्मः, शीलं, नीतिश्च** इत्यस्मिन् विषये विशिष्टव्याख्यानम् अकुर्वन्।

अस्मिन् कार्यक्रमे मार्गदर्शकत्वेन परिसरनिदेशकाः प्रो.के.के.षैन् महोदयाः, अध्यक्षरूपेण शिक्षाशास्त्रविद्याशाखायाः अध्यक्षाः के.के.हर्षकुमारमहोदयाः तथा आशंसावचनेन अन्ये शिक्षकाः सर्वे समुपस्थाय स्वीयोपदेशवचसा छात्रान् समुद्बोधयन्। तदनु विशेषतया छात्राध्यापकाः अपि मौलाना अबुल कलाम आजादमहोदयस्य शैक्षिकसंस्करणानि - शैक्षिकविचाराः गुणदोषाश्चेति विषये पत्रप्रस्तुतिं चाकुर्वन्। शिक्षाशास्त्रिप्रथमवर्षीयाः छात्राध्यापकाः तथा ITEP कक्ष्याः छात्राश्च कार्यक्रमस्य सफलीकरणे भागभाजः अभवन्। मधुरदानेन शान्तिमन्त्रोच्चारणेन च कार्यक्रमः अयं सुसम्पन्नो अभवत्।


GPS Map Camera
Puranattukara, Kerala, India
H545+jmr, Puranattukara, Kerala 680553, India
Lat 10.555849° Long 76.159092°
12/11/24 03:49 PM GMT +05:30
Google


GPS Map Camera
Puranattukara, Kerala, India
H545+jmr, Puranattukara, Kerala 680553, India
Lat 10.555872° Long 76.159098°
12/11/24 03:41 PM GMT +05:30
Google

# राष्ट्रियशिक्षादिवसः – स्मृतिचित्राणि

